अस्मिन् प्रश्नपत्रे **35** प्रश्नाः सन्ति। **4** मुद्रितपृष्ठानि च सन्ति।

**अनुक्रमांक** | | | | | | | | | | | | |

**गूढसंख्या** **62/SS/N**

**स्तबकः** **A**

# ( संस्कृतसाहित्यम् )
# SANSKRIT SAHITYA
# (348)

**परीक्षादिनं दिनाङ्कश्च** ____________________

**निरीक्षकयोः हस्ताक्षरम्** **1.** ____________________

**2.** ____________________

---

**सामान्य निर्देशाः –**

**1.** अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

**2.** निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

**3.** वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।

**4.** समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लख्यानि।

**5.** उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

**6.** स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।

**7.** समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# ( संस्कृतसाहित्यम् )

# SANSKRIT SAHITYA

# (348)

परीक्षासमयावधिः **(Time)** होरात्रयम् **(3 Hrs)** पूर्णांक : **100**

**निर्देश :**

(i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे इति आहत्य **35** प्रश्नाः सन्ति।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) समे प्रश्ना अनिवार्याः।

**[A]** दशानां युक्तं विकल्पं चिनुत। **1x10=10**

**1.** व्यासदेवस्य का कृतिः वर्तते ?

(क) रघुवंशम् (ख) महाभारतम् (ग) स्वप्नवासवदत्तम् (घ) रामायणम्

**2.** कुमारसम्भवे कति सर्गाः सन्ति ?

(क) सप्त (ख) अष्टादश (ग) नवदश (घ) सप्तदश

**3.** मोहमुद्गरस्तोत्रस्य रचयिता कः ?

(क) शङ्कराचार्यः (ख) वाल्मीकिः (ग) व्यासदेवः (घ) कालिदासः

**4.** कस्य माया भगवती यया जगत् सम्मोहितम् ?

(क) महेश्वरस्य (ख) ब्राह्मणः (ग) विष्णोः (घ) इन्द्रस्य

**5.** उत्तररामचरिते चित्रकारस्य नाम किम् ?

(क) अर्जुनः (ख) श्यामः (ग) अष्टावक्रः (घ) रोहसेनः

**6.** शुकनासोपदेशे यौवराज्याभिषेकः कस्य आसीत् ?

(क) शुकनासस्य (ख) चन्द्रापीडस्य (ग) तारापीडस्य (घ) वैशम्पायनस्य

7. वक्रोक्तिजीवितस्य लेखक: क: ?

(क) वामन: (ख) भामह: (ग) कुन्तक: (घ) रुद्रट:

8. क: कान्यकुब्जाधिपते: जयादित्यस्य सभापण्डित आसीत ?

(क) क्षेमेन्द्र: (ख) कल्हण: (ग) श्रीहर्ष: (घ) भट्टिस्वामी

9. दिलीप: कदा वसिष्ठाश्रमं प्राप्तवान ?

(क) सायंकाले (ख) प्रात:काले (ग) अपराह्ने (घ) मध्याह्ने

10. दाक्षिणात्यकवित्वेन कस्य प्रसिद्धि: ?

(क) दण्डिन: (ख) आनन्दवर्धनस्य (ग) कालिदासस्य (घ) भामहस्य

[B] **दशानां** यथानिर्देशम् उत्तराणि लिखत। **2x10=20**

1. रघुवंश क: लिखितवान् ? तत्र कति सर्गा: सन्ति ?

2. दिलीपस्य पत्न्या: नाम किम् ? सा च कीदृश आसीत् ?

3. ध्वनिप्रस्थानस्य आचार्य: क: ? तद्विरचितम् अलङ्कारशास्त्रं किम् ?

4. रामायणे कति श्लोका: सन्ति ? तत्र मुख्यरस: क: ?

5. बृहत्त्रय्याम् आद्यं महाकाव्यं किम् ? तस्य को लेखक: ?

6. रघुवंशमहाकाव्यं के श्रोतुं शक्नुवन्ति ? अग्ने: किं कार्यं भवति ?

7. विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति: इति कस्य सूत्रम् ? कुत्र उपलभ्यते सूत्रम् इदम्।

8. यते: लक्षणं किम् ? सा च कतिविधा ?

9. शब्दस्य अर्थस्य उभयस्य प्राधान्यं कस्मिन् अलङ्कारे अस्ति ? तस्यालङ्कारस्य उदाहरणं देयम् ?

10. पार्वतीपरमेश्वरौ कौ इव सम्पृक्तौ स्त: ? कवि: कथं तयो: नमस्कारं करोति।

**[C] दशानां** अनतिदीर्घोत्तरैः समाधान। **4x10=40**

1. श्रीरामचन्द्रस्य बुद्धिमत्तादिगुणान् प्रतिपादयत।

2. उत्तररामचरितानुसारेण प्रस्रवणपर्वतं यथामति वर्णयत।

3. पण्डितराजस्य जगन्नाथस्य कविराजस्य विश्वनाथस्य वा देशकालकृतीः अबलम्ब्य एकं प्रबन्धं लिखत।

4. ''क्व सूर्यप्रभवो वंशः'' इति ''वैवस्वतो मनुर्नाम्'' इति वा इति प्रतिकोद्धृतं श्लोकं प्रपूर्य व्याख्यात।

5. मोहमुद्गरस्तोत्रस्य सारं यथाग्रन्थं प्रतिपादयत।

6. ''स्नेहात्सभाजयितुम्'' इति ''विश्वम्भरा भगवती'' इति वा प्रतीकोद्धृतं श्लोकं सम्पूर्य व्याख्यात।

7. यौवनस्वभावः कीदृशो भवति शुकनासनये वर्णयत।

8. भुजङ्गप्रयातं मन्दाक्रान्ता इत्यनयोः एकस्य च्छन्दसः लक्षणम् उक्त्वा उदाहरणे लक्षणसमन्वयः कार्यः।

9. रसप्रकारान् ग्रन्थदिशा प्रतिपादयत।

10. धूर्तसमावृता राजानः कथम् उपहास्या भवन्ति इति प्रतिपादयत।

**[D] पञ्च** दीर्घोत्तरैः समाधेयाः। **6x5=30**

1. अष्टावक्रमूखेन रामं सीतां च प्रति गुरुजनोपदेशान् यथाग्रन्थं प्रतिपादयत।

2. बालिका कथम् आश्रयं प्राप्ता इति ब्रह्मचारिमुखेन वर्णयत।

3. शुकनासनये लक्ष्म्याः विचित्रं चरितं वर्णयत।

4. दृष्टान्तः यमकम् इत्यनयोः एकम् अलङ्कारं सोदाहरणं प्रतिपादयत।

5. रससूत्रं प्रतिपाद्य रसविषये मतभेदान् प्रतिपादयत।

**- o O o -**